## ६५. मित्रयोः सम्भाषणम्

अपेक्षया

प्रकाशः - मुकुन्द ! पठनं कथं प्रचलति ? कति विषयान् समापितवान् ?

मुकुन्दः - ह्यः द्वौ विषयौ समापितवान् । भवतः अपेक्षया मम पठनं न्यूनम् एव । पठने तावती आसक्तिः नास्ति मम । पठनस्य अपेक्षया अधिकं लिखामि यतः स्मरणे तिष्ठति खलु ?

प्रकाशः - मम गृहं ह्यः बान्धवाः आगतवन्तः । अतः अध्ययनस्य अपेक्षया जल्पनम् अधिकम् अभवत् ।

मुकुन्दः - इतिहासशिक्षकस्य अपेक्षया गणितशिक्षकम् अहम् इच्छामि। तस्य पाठनशैली सर्वेषाम् अपेक्षया उत्तमा।

प्रकाशः - भवतां शिक्षकस्य अपेक्षया संस्कृतशिक्षिका रोचकतया पाठयति। वयं तु तस्याः पाठनस्य निरीक्षां कुर्मः।

मुकुन्दः - परं मुख्योपाध्यायः तु सर्वेषां अधिकम् उत्साहं, प्रेरणाञ्च पूरयति । केवलम् अध्ययनस्य अपेक्षया अन्येषु विषयेषु अपि प्रोत्साहं ददाति । अतः एव अन्येषां विद्यालयानाम् अपेक्षया अस्माकं विद्यालयः अत्युत्तमः, आदर्शभूतः च अस्ति ।